श्री गजानन स्तोत्रं (देवर्षि कृतं)

श्री गजानन स्तोत्रं (देवर्षि कृतं)

देवर्षय ऊचुः |
विदेहरूपं भवबंधहारं
सदा स्वनिष्ठं स्वसुखप्रदं तं |
अमेयसांख्येन च लभ्यमीशं
गजाननं भक्तियुता भजामः ||1||

मुनींद्रवंद्यं विधिबोधहीनं
सुबुद्धिदं बुद्धिधरं प्रशांतं |
विकालहीनं सकलांतगं वै
गजाननं भक्तियुता भजामः ||2||

अमेयरूपं हृदि संस्थितं तं
ब्रह्माहमेकं भ्रमनाशकारं |
अनादिमध्यांतमपाररूपं
गजाननं भक्तियुता भजामः ||3||

जगत्प्रमाणं जगदीशमेव-
-मगम्यमाद्यं जगदादिहीनं |
अनात्मनां मोहप्रदं पुराणं
गजाननं भक्तियुता भजामः ||4||

न भूर्न रूपं न जलं प्रकाशं
न तेजसिस्थं न समीरणस्थं |
न खे गतं पंचविभूतिहीनं
गजाननं भक्तियुता भजामः ||5||

न विश्वगं तैजसगं न प्राज्ञं
समष्टिव्यष्टिस्थमनंतगं न |
गुणैर्विहीनं परमार्थभूतं
गजाननं भक्तियुता भजामः ||6||

गुणेशगं नैव च बिंदुसंस्थं
न देहिनं बोधमयं न ढुंढिं |
संयोगहीनाः प्रवदंति तत्स्थं
गजाननं भक्तियुता भजामः ||7||

अनागतं नैव गतं गणेशं
कथं तदाकारमयं वदामः |
तथापि सर्वं प्रभुदेहसंस्थं
गजाननं भक्तियुता भजामः ||8||

यदि त्वया नाथ कृतं न किंचि-
-त्तदा कथं सर्वमिदं विभाति |
अतो महात्मानमचिंत्यमेव
गजाननं भक्तियुता भजामः ||9||

सुसिद्धिदं भक्तजनस्य देवं
स कामिकानामिह सौख्यदं तं |
अकामिकानां भवबंधहारं
गजाननं भक्तियुता भजामः ||10||

सुरेंद्रसेव्यं ह्यसुरैः सुसेव्यं
समानभावेन विराजयंतं |
अनंतवाहं मुषकध्वजं तं
गजाननं भक्तियुता भजामः ||11||

सदा सुखानंदमये जले च
समुद्रजे चेक्षुरसे निवासं |
द्वंद्वस्य पानेन च नाशरूपे
गजाननं भक्तियुता भजामः ||12||

चतुःपदार्था विविधप्रकाशा-
-स्त एव हस्ताः स चतुर्भुजं तं |
अनाथनाथं च महोदरं वै
गजाननं भक्तियुता भजामः ||13||

महाखुमारूढमकालकालं
विदेहयोगेन च लभ्यमानं |
अमायिनं मायिकमोहदं तं
गजाननं भक्तियुता भजामः ||14||

रविस्वरूपं रविभासहीनं
हरिस्वरूपं हरिबोधहीनं |
शिवस्वरूपं शिवभासनाशं
गजाननं भक्तियुता भजामः ||15||

महेश्वरीस्थं च सुशक्तिहीनं
प्रभुं परेशं परवंद्यमेवं |
अचालकं चालकबीजभूतं
गजाननं भक्तियुता भजामः ||16||

शिवादिदेवैश्च खगैः सुवंद्यं
नरैर्लतावृक्षपशुप्रभूभिः |
चराचरैर्लोकविहीनमेवं
गजाननं भक्तियुता भजामः ||17||

मनोवचोहीनतया सुसंस्थं
निवृत्तिमात्रं ह्यजमव्ययं तं |
तथापि देवं पुर आस्थितं तं
गजाननं भक्तियुता भजामः ||18||

वयं सुधन्या गणपस्तवेन
तथैव नत्यार्चनतस्तवैव |
गणेशरूपाश्च कृतास्त्वया तं
गजाननं भक्तियुता भजामः ||19||

गजाख्यबीजं प्रवदंति वेदा-
-स्तदेव चिह्नेन च योगिनस्त्वां |
गच्छंति तेनैव गजाननस्त्वं
गजाननं भक्तियुता भजामः ||20||

पुराणवेदाः शिवविष्णुकाद्या-
-ऽमराः शुकाद्या गणपस्तवे वै |
विकुंठिताः किं च वयं स्तवाम
गजाननं भक्तियुता भजामः ||21||

मुद्गल उवाच |
एवं स्तुत्वा गणेशानं नेमुः सर्वे पुनः पुनः |
तानुत्थाप्य वचो रम्यं गजानन उवाच ह ||22||

गजानन उवाच |
वरं ब्रूत महाभागा देवाः सर्षिगणाः परं |
स्तोत्रेण प्रीतिसंयुक्तः परं दास्यामि वांछितं ||23||

गजाननवचः श्रुत्वा हर्षयुक्ताः सुरर्षयः |
जगुस्तं भक्तिभावेन साश्रुनेत्राः प्रजापते ||24||

देवर्षय ऊचुः |
गजानन यदि स्वामिन् प्रसन्नो वरदोऽसि भोः |
तदा भक्तिं दृढां देहि लोभहीनां त्वदीयकां ||25||

लोभासुरस्य देवेश कृता शांतिः सुखप्रदा |
तदा जगदिदं सर्वं वरयुक्तं कृतं त्वया ||26||

अधुना देवदेवेश कर्मयुक्ता द्विजादयः |
भविष्यंति धरायां वै वयं स्वस्थानगास्तथा ||27||

स्वस्वधर्मरताः सर्वे गजानन कृतास्त्वया |
अतःपरं वरं याचामहे ढुंढे कमप्यहो ||28||

यदा ते स्मरणं नाथ करिष्यामो वयं प्रभो |
तदा संकटहीनान् वै कुरु त्वं नो गजानन ||29||

एवमुक्त्वा प्रणेमुस्तं गजाननमनामयं |
स तानुवाच प्रीतात्मा भक्त्यधीनस्वभावतः ||30||

गजानन उवाच |
यद्यच्च प्रार्थितं देवा मुनयः सर्वमंजसा |
भविष्यति न संदेहो मत्स्मृत्या सर्वदा हि वः ||31||

भवत्कृतमदीयं वै स्तोत्रं सर्वत्र सिद्धिदं |
भविष्यति विशेषेण मम भक्तिप्रदायकं ||32||

पुत्रपौत्रप्रदं पूर्णं धनधान्यविवर्धनं |
सर्वसंपत्करं देवाः पठनाच्छ्रवणान्नृणां ||33||

मारणोच्चाटनादीनि नश्यंति स्तोत्रपाठतः |
परकृत्यं च विप्रेंद्रा अशुभं नैव बाधते ||34||

संग्रामे जयदं चैव यात्राकाले फलप्रदं |
शत्रूच्चाटनकाद्येषु प्रशस्तं तद्भविष्यति ||35||

कारागृहगतस्यैव बंधनाशकरं भवेत् |
असाध्यं साधयेत् सर्वमनेनैव सुरर्षयः ||36||

एकविंशतिवारं चैकविंशति दिनावधिं |
प्रयोगं यः करोत्येव स भवेत् सर्वसिद्धिभाक् ||37||

धर्मार्थकाममोक्षाणां ब्रह्मभूतस्य दायकं |
भविष्यति न संदेहः स्तोत्रं मद्भक्तिवर्धनं |
एवमुक्त्वा गणाधीशस्तत्रैवांतरधीयत ||38||